# संस्कृत वार्ता:

**दिनाङ्क : 28/06/2026**
**सायम् - 06:20**

## आदौ मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी प्रत्यपादयत् यत् स्वदेशी-प्रतिरक्षोत्पादने सविशेषं बलं विधाय भारतं समुद्रतः आकाशपर्यन्तं उत्तरोत्तरं सुरक्षितं आत्मनिर्भरं च भवति।

- आकाशवाण्याः 'मन की बात' कार्यक्रमे प्रधानमन्त्रिणा मोदिना देशस्य नागरिकाणां प्रति कृार्तज्ञभावं ज्ञापितम्, यतोहि जनैः स्वर्ण-क्रयणं विदेश-यात्रा च कञ्चित्कालं यावत् स्थगिता सहैव 'कारपूलिंग' प्रवर्धयितुं तस्य सद्यःकृतस्य आग्रहस्य सक्रियरूपेण समर्थनं जनैः कृतम्।

- सेशल्स-देशस्य 'विक्टोरिया' नगरे आयोजितायाः प्रतिनिधिमण्डल-स्तरीय-वार्तायाः अनन्तरं भारत-सेशल्स देशयोः मध्ये स्वास्थ्यं, कृषिः, वित्तं समेत्य अन्तरिक्षादि विविध-विषयेषु महत्वपूर्ण-सहमति-पत्रेषु हस्ताक्षराणि अभवन्।

- प्रशासनेन भारतीय-नागरिकाः संचेतिताः यत् ते सर्वेषां आवश्यकानां यात्रा-पत्राणां पूर्तिकया विना 'कैलास-मानसरोवर-यात्रां' न आरभेरन्।

- पश्चिम-एशिया' देशे सुरक्षा-स्थितिः तीव्रगत्या अपक्षीयते यत्र संयुक्तराज्य-अमेरिका , ईरानः उभावपि परस्परं नूत्नानि सैन्य-आक्रमणानि अकुरूताम्।

- आईसीसी महिला टी-२० विश्वकप स्पर्धामीलिकायां भारतीय-महिला-दलं अद्य लण्डन-नगरे ऑस्ट्रेलिया-दलेन सह स्पर्धिष्यते ।

## अथ वार्ता: विस्तरेण

### प्रधानमन्त्री – मन की बात

प्रधानमन्त्री नरेन्द्रमोदी अद्य सविशेषं प्रत्यपादयत् यत् भारतेन जून-मासे वैमानिकी-क्षेत्रे एका महती सफलता अर्जिता, यत्र स्वदेशनिर्मितस्य 'मेक इन इण्डिया' **सी-295** सैन्य-परिवहन-विमानस्य प्रथमं परीक्षण-उड्डयनं सफलतापूर्वकं सम्पन्नम्। आकाशवाण्याः 'मन की बात' कार्यक्रमे जनान् सम्बोधयन् प्रधानमन्त्रिणा इयं सूचना प्रख्यापिता यत् सम्प्रति एतादृशानि चत्वारिंशत् विमानानि भारतदेशे एव विनिर्मियन्ते।

श्रीमोदिना गदितं यत् देशे अन्ये केचन महत्वपूर्णाः प्रयासाः विधीयन्ते। अस्मिनैव क्रमे देहल्यां स्थितः केन्द्रीय-संस्कृत-विश्वविद्यालयः 'आर्टिफ़िशियल इन्टेलिजेन्स' (कृत्रिमबुद्धिमत्ता) तथा 'डेटा साइन्स' इत्यादिषु आधुनिक-विषयेषु बी.टैक पाठ्यक्रमस्य शुभारम्भं विदधाति।

प्रधानमन्त्री मोदी सहर्षं न्यगादीत् यत् अद्य भारतीयसंस्कृतिः विश्वश्मिन् हि विश्वे प्रसरति। प्रधानमन्त्री नरेन्द्रमोदी गौरवान्वितः अस्ति यत् भारतेन अस्मिन् मासे देशस्य सुरक्षायाः आत्मनिर्भरतायाः च क्षेत्रे महती सफलता अर्जिता। सः कोलकाता-नगरे आयोजितम् एकं नौसेना-सम्बन्धि-कार्यक्रमं सम्बोधितवान्, यत्र 'आईएनएस दुनागिरि' , 'आईएनएस संशोधक' तथा 'आईएनएस

अग्रयश्च ' भारतीय-नौसेनायाः क्षेत्रे समाविष्टाः। प्रधानमन्त्रिणा प्रतिपादितं यत् भारतं समुद्रतः आकाशपर्यन्तं उत्तरोत्तरं सुरक्षितं तथा च आत्मनिर्भरं भवति।

प्रधानमन्त्रिणा अन्ताराष्ट्रिय-योगदिवसस्य अपि उल्लेखो विहितः। तेन अहमदाबाद-नगरे आयोजितायाः 'विश्व-योगासन-विजेतृ-प्रतियोगितायाः' विषये कथितं यत्- अस्यां भारतेन द्वयधिकैकशत सुवर्णपदकैः सह आहत्य चतुर्दशोत्तरैकशतपदकानि विजितानि।

प्रधानमन्त्रिणा मोदिना प्रतिपादितं यत् राष्ट्रनिर्माणे 'जनसहभागितायाः' शक्तिः भारतस्य कृते एका महती सम्पत्तिः अस्ति।

अस्मिन् मन की बात संस्करणे प्रधानमन्त्री नरेन्द्रमोदी 'अन्धविश्वास' इति गभीर-विषयं अपि स्पृष्टीकृतवान् ।

अनेन सहैव, श्रीमोदिना उक्तं यत् आगामी-गणेशोत्सवाय 'गणपतिबाप्पा' भगवतः प्रतिमा अनिवार्यरूपेण अस्यैव देशस्य मृत्तिकायाः भवेत्, सा च स्थानीय-कुम्भकारैः शिल्पिभिः विनिर्मिता स्यात्। तेन मूर्तिनिर्मातारः अपि अनुरूद्धाः यत् ते मृण्मय-मूर्तिनां निर्माणाय एव प्राथमिकतां दद्युः।

स्वीय-सम्बोधनस्य चरमे सोपाने प्रधानमन्त्रिणा जलसंरक्षणस्य विषये च बलं प्रदत्तम्। तेन कथितं यत् वर्षाजलस्य एकैकोपि बिन्दुः संरक्षणीय: अस्ति। श्रीमोदिना विशेषरूपेण गदितं यत् जलसंरक्षणार्थं 'कैच द रेन' अभियानस्य वेगः मन्दो न भवेत्।

**विरामः**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**प्रधानमंत्री-सेशेल्स**

प्रधानमन्त्री नरेन्द्रमोदी सेशल्स-देशस्य राष्ट्रपतिः पैट्रिक हर्मिनी च अद्य अपराह्णे 'विक्टोरिया' नगरे द्विपक्षीय-वार्ताम् अकुरूताम्। उभौ नेतारौ द्विपक्षीय-सहयोगस्य सम्पूर्ण-क्षेत्राणां समीक्षां कृतवन्तौ सहैव पारस्परिक-हितस्य क्षेत्रीय-अन्ताराष्ट्रिय-विषयेषु च स्वस्व मनोगतं विनीमयी कृतवन्तौ। तस्मात् पूर्वं, सेशल्स-देशेन प्रधानमन्त्रिणे नरेन्द्रमोदिने पर्यावरण-नेतृत्वस्य सर्वोच्च-सम्मानः 'गार्डियन ऑफ द ब्लू होरिजन' प्रदत्तः।

संयुक्त-वार्ताहर-सम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी अवोचत् यत् "अयं 'गार्डियन ऑफ द ब्लू होरिजन' सम्मानः मम कृते अथ भारतस्य नागरिकाणां कृते परम-गौरवस्य विषयो वर्तते।

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् "द्वयोः देशयोः दूरत्वं न्यूनीकर्तुं डिजिटल-प्रौद्योगिकी प्रभावपूर्णं माध्यमं वर्तते।" तेन एतदर्थं प्रसन्नता प्रदर्शिता यत् अद्य सेशल्स-देशे भारतस्य 'यूपीआई' तन्त्रस्य प्रवर्तनाय एकस्मिन् सहमति-पत्रे हस्ताक्षरं क्रियमाणं अस्ति।

वार्ताहरैः सह भाषमाणः सेशल्स-देशस्य राष्ट्रपतिना प्रतिपादितं यत् उभयोः देशयोः मध्ये वार्ता व्यापिका भविष्योन्मुखी च आसीत्, या सेशल्स-भारतयोः प्रगाढ-मैत्री-सम्बन्धान् पारस्परिक-विश्वासं च प्रकटीकरोति।

निर्धारित-कार्यक्रमानुसारं प्रधानमन्त्री नरेन्द्रमोदी सेशल्स-देशस्य राष्ट्रिय-सभां सम्बोधितवान् सहैव तत्रत्य भारतीय-प्रवासिभिः सह संवादं कृतवान्। तदनन्तरं, सः सेशल्स-देशस्य राष्ट्रिय-दिवसस्य सुवर्णजयन्ती-समारोहे 'मुख्य-अतिथित्वेन भागं ग्रहीष्यति।

## कैलाशमानसरोवरयात्रा

विदेशमन्त्रालयेन भारतीयनागरिकाः परामृष्टाः यत् सम्पूर्णयात्रायाः कृते आवश्यकानि सर्वाणि यात्रापत्राणि विना कैलाशमानसरोवरयात्रा न क्रियताम्। केचन भारतीयतीर्थयात्रिण: नेपाले अवरुद्धा: अभवन् सहैव साहाय्यार्थं प्रार्थितवन्तः। एताम् घटनाम् उद्दिश्य विदेशमन्त्रालयेन एषः परामर्शः प्रख्यापित:।

## अमेरिका-ईरान

पश्चिम-एशियाक्षेत्रे सुरक्षा-स्थितिः पुनरपि गभीरा जाता। अमेरिका-ईरान-देशयोर्मध्ये विद्यमानः युद्धविरामः खण्डितः, गतकतिपयहोरासु च उभयपक्षाभ्यां परस्परं नूतनानि सैन्याक्रमणानि कृतानि। तेहरानेन वाणिज्यिक-तैलवाहकपोतस्य उपरि ड्रोणाक्रमणं विहितमिति आरोपं कृत्वा, अमेरिकया होर्मुज़-जलसन्धेः समीपे स्थितेषु दशसु ईरानी-सैन्यस्थानकेषु वायुप्रहाराः कृताः। अमेरिकादेशस्य राष्ट्रपतिः डोनाल्ड ट्रम्प अवदत् यत्, युद्धविरामस्य पुनरपि उल्लङ्घने सति अत्यन्तं व्यापकं सैन्यप्रत्युत्तरं प्रदास्यते। प्रत्युत्तररूपेण ईरान देशेन अल्पकालानन्तरमेव कुवैत-बहरीन-देशयोः स्थितानि अमेरिकी-सैन्यस्थानानि लक्ष्यीकृत्य क्षेपणास्त्रैः ड्रोणैश्च आक्रमणानि कृतानि।

## क्रिकेट

अद्य महिला-विंशतिः-प्रतिविंशतिः-विश्वकप-क्रिकेट्-स्पर्धायाः समूह-'ए' इत्यस्य चरम् स्पर्धायां भारतम् आस्ट्रेलियादेशेन सह स्पर्धिष्यते । एषा स्पर्धा लन्दन-नगरस्य लॉर्ड्स-क्रिकेट्-क्रीडाङ्गणे भविष्यति। स्पर्धा भारतीयसमयागुणं सायं सप्तवादने आरभ्यते।

**।। इति वार्ता: ।।**